# নবরত্নমালা কালিদাসবিরচিতম্

{॥ নবরত্নমালা কালিদাসবিরচিতম্ ॥}

ওঙ্কারপঞ্জরশুকীমুপনিষদুদ্যানকেলিকলকণ্ঠীম্ ।
আগমবিপিনমযূরীমার্যামন্তর্বিভাবযে গৌরীম্ ॥ ১॥

দযমানদীর্ঘনযনাং দেসিকরূপেণদর্শিতাভ্যুদযাম্ ।
বামকুচনিহিতবীণাং বরদাং সঙ্গীতমাতৃকাং বন্দে ॥ ২॥

শ্যামলিমসৌকুমার্যাং সৌন্দর্যানন্দসম্পদুন্মেষাম্ ।
তরুণিমকরুণাপূরাং মদজলকল্লোললোচনাং বন্দে ॥ ৩॥

নখমুখমুখরিতবীণানাদসাস্বাদনবনবোল্লাসাম্ ।
মুখমম্ব মোদযতু মাং মুক্তাতাটঙ্কমুগ্ধহসিতং তে ॥ ৪॥

সরিগমপধনিরতাং তাং বীণাসঙ্ক্রান্তহস্তাং তাম্ ।
শান্তাং মৃদুলস্বান্তাং কুচভরতান্তাং নমামি শিবকান্তাম্ ॥ ৫॥

অবটুতটঘটিতচূলীতাডিততালীপলাশতাটঙ্কাম্ ।
বীণাবাদনবেলাকম্পিতশিরসং নমামি মাতঙ্গীম্ ॥ ৬॥

বীণারবানুষঙ্গং বিকচমুখাম্ভোজমাধুরীভৃঙ্গম্ ।

করুণাপূরতরঙ্গং কলযে মাতঙ্গকন্যকাপাঙ্গম্ ॥ ৭॥

মণিভঙ্গমেচকাঙ্গীং মাতঙ্গীং নৌমি সিদ্ধমাতঙ্গীম্ ।

যৌবনবনসারঙ্গীং সঙ্গীতাম্ভোরুহানুভবভৃঙ্গীম্ ॥ ৮॥

মেচকমাসেচনকং মিথ্যাদৃষ্টান্তমধ্যভাগং তে ।

মাতস্স্বরূপমনিশং মঙ্গলসঙ্গীতসৌরভং বন্দে ॥ ৯॥

Encoded and proofread by Sunder Hattangadi sunderh@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Navaratnamala ( By Kalidasa ) Lyrics in Bengali PDF
% File name : navaratnamala.itx
% Category : kalidasa
% Location : doc_devii
% Author : Kalidasa
% Language : Sanskrit
% Subject : literature
% Transliterated by : Sunder Hattangadi (sunderh at hotmail.com)
% Proofread by : Sunder Hattangadi (sunderh at hotmail.com)
% Description-comments : A poem by Kalidasa
% Latest update : Feb. 27, 2008
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website